दिनाङ्क :- 08.02.2026 प्रात: - 06:55

## प्रधानमंत्री मलेशिया

प्रधानमन्त्रिणा नरेन्द्रमोदिना भारत-मलेशिया-देशयोः मध्ये प्रगाढः जनसम्पर्कः उद्घाटितः। ह्य: क्वालालम्पूर्-नगरे एकस्मिन् कार्यक्रमे भारतीय- प्रवासिनाम् जनसभां श्री मोदी सम्बोधितवान् । समृद्धस्य मलेशिया-देशस्य, विकसितस्य भारतस्य च दृष्ट्या योगदानार्थं सः तेषाम् जनानां प्रशंसाम् अकरोत्।

श्रीमोदी मलेशिया-देशस्य द्विदिवसात्मक -आधिकारिकयात्रायाम् ह्यः क्वालालम्पूर्-नगरं प्राप्तवान् यत्र तस्य भव्यं स्वागतम् अभवत्। श्री मोदी अद्य मलेशिया-देशस्य प्रधानमन्त्रिणा सह वार्तालापं करिष्यति, तदनन्तरं अनेकेषु एम्. ओ. यू. इत्येतेषु हस्ताक्षराणि च भवितुम् अर्हन्ति।

-

## मलेशियादेशस्य यात्रा जायसवालः

विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् भारतस्य मलेशियादेशेन सह व्यापकः रणनीतिकः-सम्बन्धः अस्ति, यस्य मूलानि ऐतिहासिकैः सांस्कृतिकैश्च सम्बन्धैः सह निहितानि सन्ति। प्रधानमन्त्रिणः नरेन्द्रमोदिनः मलेशियादेशस्य यात्रायाः विषये जायसवालः अवदत् यत् यात्रावधौ विविधाः समृद्धाः कार्यक्रमाः आयोज्यन्ते। सः अवदत् यत् एषा यात्रा उभयोः देशयोः मध्ये पारस्परिकान् संबंधान् अपि सुदृढीकरिष्यति।

## गोयल-इण्डिया यू एस पी सी

वाणिज्योद्योग-मन्त्री पीयूषगोयलः अवदत् यत् भारतीय-निर्यातृभ्यः भारत-अमरीका-अन्तरीम-व्यापार-सन्धेः अन्तर्गतं पञ्चाशत प्रतिशतं पारस्परिक-शुल्कं अधुना अष्टादश प्रतिशतं यावत् न्यूनीकृतम् अस्ति इति। नवदेहली-नगरे भारत-अमेरिका-संयुक्त-वक्तव्यस्य विषये प्रसारमाध्यमान् सम्बोधयन् श्री गोयल्-वर्यः अवदत् यत् चीन, पाकिस्तान, बाङ्ग्लादेशः, वियतनाम् इत्यादीनां प्रतिवेशिनां देशानाम् अपेक्षया भारतस्य शुल्कं न्यूनम् अस्ति इति। श्री गोयल् वर्यः अधोरेखितवान् यत् अयं व्यवहारः देशस्य कृषिक्षेत्रस्य, दुग्धक्षेत्रस्य च रक्षणं करोति।

## सेशेल्सस्य राष्ट्रपति - यात्रा

सेशेल्सस्य राष्ट्रपतिः पैट्रिक् हर्मिनी, भारतस्य पञ्चदिवसीयायां यात्रायां , ह्य: प्रथममहिला वेरोनिक हर्मिनी इत्यनया सह मुम्बई -नगरे आगतः। सेशेल्स राष्ट्रपतिः केन्द्रीय-नौकाश्रय-नौवहन-जलमार्ग-मन्त्रिणा सरबानंदा सोनोवाल इत्यनेन सह मिलितवान्, अनन्तरं भारतीय-उद्योग-परिसङ्घेन (सि. आई. आई.) आयोजिते भारत-सेशेल्स-वाणिज्य सम्मेलने भागम् अगृह्णात्। सम्मेलनं सम्बोधयन् राष्ट्रपतिः हर्मिन् वर्यः अवदत् यत् विगत पंचाशत् वर्षेषु भारत-सेशेल्स्-देशयोः सम्बन्धः सुदृढः अभवत्।

## क्रिकेट्

पुरुष-क्रिकेट्-क्रीडायां गतरात्रौ मुम्बै-नगरस्य वांखेडे-क्रीडाङ्गणे टी-20-विश्वकप्-क्रीडायाः तृतीयायां स्पर्धायां भारतं अमेरिकां ऊनत्रिंशत् अंकैः पराजयत। आदौ संयुक्तराज्यामेरिकीय दलेन पणकं विजित्य प्रथमं कन्दुकक्षेपणं निश्चितम्। सूर्यकुमार यादवः क्रीडायाः नायकत्वेन उद्घोषितः। विश्वकप्-क्रीडायाः चतुर्थायां स्पर्धायां चेन्नै-नगरस्य एम्. ए. चिदम्बरम्-क्रीडाङ्गणे न्यूजीलैण्ड्-देशः अफ्गानिस्तान्-देशेन सह स्पर्धिषीष्ट। प्रातः 11.00 वादने क्रीडा आरप्स्यते ।

## संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

॥ इति वार्ता:॥